भौमपराक्रमे।
"वामे कृष्णं बलीवर्द्दं दक्षिणे लोहितं न्यसेत्।
उत्तराभिमुखो भूत्वा कर्षकः कृषिमारभेत्॥
हले तु योजिते यत्र क्षेत्रे ग्रासं करोति गौः।
तत्र स्याद्द्विगुणं शस्यमवश्यं गर्गभाषितम्॥"*॥
कृत्यचिन्तामणौ बलभद्रः।
"सुखदा प्रतिपच्चैव द्वितीया कार्य्यसाधिनी।
आरोग्यदा तृतीया च चतुर्थी कीटकृत् सदा॥
पञ्चमी श्रीप्रदा नूनं षष्ठी च कलहप्रिया॥
सप्तमी स्यानन्दः भोग्या द्रुषं हन्ति तथाष्टमी॥
नवमी शस्यनाशाय दशमी भूतिदा सदा।
एकादशी तथा कुर्य्याद्धनं धान्यं मनोरथम्॥
द्वादशी प्राणसन्देहा सर्व्वसिद्धा त्रयोदशी।
चतुर्द्दशी पतिं हन्ति पञ्चदश्येव निष्फला॥
अमावस्याष्टमीषष्ठीरिक्ताश्च परिवर्ज्जयेत्।
सौरिभौमदिने चैव कृष्यारम्भे धनक्षयः॥
प्राजेशविष्णुतिष्येषु पितृकरोत्तरेषु च।
अश्विनीवातपौष्णेषु मूलादितीन्दुभे तथा॥
वारे भानुजशुक्रे च जीवे शीतकरे तथा।
लग्ने स्त्रीगोमीनयुग्मे कृष्यारम्भं शुभं विदुः॥
ऐशान्यां पुष्पनैवेद्यैः क्षेत्रपालञ्च पूजयेत्।
सालङ्कारो हलधरः स्रग्भिश्च पूजितं हलम्।
दध्याज्यमधुभिः श्रेष्ठं फलाग्रञ्च प्रलेपितम्।
कर्षं प्रावर्त्तयेत् प्राज्ञो नूतनेन हलेन च॥*॥
हस्ताश्वतिष्यचन्द्रेषु ब्रह्मेन्द्रविष्णुवारुणे।
वायव्यैन्द्राग्निभे चैव रोहिण्यामुत्तरासु च॥
वारे जीवज्ञशुक्रे च सोमे दिनकरे तथा।
युग्मे युवतिगोमीने शस्तं स्याद्बीजवापनम्॥"
राजमार्त्तण्डे।
"प्राजेशश्रवणोत्तरादितिमघामार्त्तण्डतिष्या-
श्विनी-
पौष्णानुष्णमरीचयः शतभिषा स्वाती विशाखा
तथा।
जीवार्केन्दुसितेन्दुनन्दनदिने वारे स्थिरस्योदये
शस्यानां वपने भवन्ति लवने शस्ते तिथौ
रोपणे॥"

देवलः।
"गुरुसोमसूर्य्यशुक्राः क्षेम्याः सम्पत्कराः
शुभाः।
बुधार्किभूमिपुत्राश्च न भवन्ति फलप्रदाः॥
हन्ति मेषः पशून् सर्व्वान् स्वभावेनाथ वृश्चिकः।
कर्क्कटेन भवेत् सौख्यं तुलायां न प्ररोहति॥
केशरी शस्यघाती स्यात् पार्थिवोपद्रवं धनुः।
मकरे चैव कुम्भे च भयमेव विनिर्द्दिशेत्।
गोस्त्रीमन्मथमीनेषु शस्यं सम्पद्यते महत्॥*॥
प्रशस्ते चन्द्रतारे च शुचिः शुक्लेन वाससा।
स्नात्वा गन्धैश्च पुष्पैश्च पूजयित्वा विधानतः॥
पृथ्वीञ्च ग्रहसंयुक्तां पूजयित्वा प्रजापतिम्।
अग्निं प्रदक्षिणीकृत्य दीयते भूरिदक्षिणा॥
कृष्णौ वृषौ नियोक्तव्यौ नवनीतैर्घृतेन वा।
मुखपार्श्वं तयोर्लिम्पात् फालाग्रं कनकैः स्पृशेत्।
उत्तराभिमुखो भूत्वा क्षीरेणार्घ्यं प्रदापयेत्।
ततः शुभकरः श्रीमान् कृषिकर्म्म समाचरेत्॥*
वर्ज्जयेत् भग्नशृङ्गञ्च खुरभङ्गञ्च वर्ज्जयेत्।
विकलं छिन्नलाङ्गूलं कपिलं वृषभं तथा॥
हलप्रवाहणं कार्य्यं नीरुग्भिः कृषिकर्म्मकैः।
हलादिभिर्द्दृढैः क्षेममदृढैर्न शुभं भवेत्॥
वृषभा यदि मुह्यन्ति तस्य विघ्नप्रदा भवेत्॥"
कृषिरिति शेषः।
"तस्मात् सर्व्वप्रयत्नेन निर्व्विघ्नं कारयेत् सदा॥
एका जयकरी रेखा तृतीया चार्थदायिका।
पञ्चमी या भवेद्रेखा बहुशस्यफला हि सा॥
अत ऊर्द्ध्वं न कर्त्तव्यं महादोषस्ततो भवेत्॥
संपूज्याग्निं द्विजं देवं कुर्य्याज्जलप्रवर्त्तनम्।
हेमनि घृष्टफालाग्रं छिन्नरेखां न कारयेत्॥
स्मर्त्तव्या वसवश्चेन्द्रः पृथू रामः सचन्द्रमाः।
पराशरो बलभद्रः सर्व्वविघ्नोपशान्तये॥ * ॥
हले प्रवाह्यमाणे तु कूर्म्म उत्पद्यते यदि।
गृहिणी म्रियते तस्य ततोऽग्नेश्च भयं भवेत्॥
लाङ्गलं भिद्यते चापि प्रभुस्तत्र विनश्यति।
ईशाभङ्गो यदा कर्त्तुः संशयो जीवितस्य च॥
सुतनाशो युगभङ्गे समीने म्रियते सुतः।"
समीने योक्त्रबन्धनकाष्ठद्वये।
"योक्त्रच्छेदे तु व्यासङ्गः शस्यहानिश्च जायते॥
हले प्रवाह्यमाणे तु गौरेकः प्रपतेद्यदि।
प्रपतेद्युक्तमात्रस्तु बन्धनं स प्रपद्यते।
ज्वरातिसाररोगेण कृषिभङ्गं विनिर्द्दिशेत्॥
प्रवहेत् युक्तमात्रस्तु ततो गौः प्लवते यदि।
वत्सालोढ़ेन नर्द्दन्ति ततः शस्यं चतुर्गुणम्॥ * ॥
हेमवारिविलिप्तस्य बीजस्योन्नयतः शुचिः।
इन्द्रं चित्ते विधायाथ स्वयं मुष्टित्रयं वपेत्॥
कृत्वा चान्योन्यप्रोत्साहं कर्षको हृष्टमानसः।
प्राङ्मुखः कलसं गृह्य इमं मन्त्रमुदीरयेत्॥
त्वं वै वसुन्धरे सीते बहुपुष्पफलप्रदे।
नमस्ते मे शुभं नित्यं कृषिं मेधां शुभे कुरु॥
रोहन्तु सर्व्वशस्यानि काले देवः प्रवर्षतु।
कर्षकास्तु भवन्त्यग्रा धान्येन च धनेन च
स्वाहा॥"*॥

कृत्यरत्नाकरे ब्रह्मपुराणम्।
"चैत्रे च कृष्णपञ्चम्यां काश्मीरा च रजस्वला।
नित्यं भवति तस्मात्तां कृत्वा शैलमयीं स्त्रियम्॥
अभ्यङ्गवस्त्रनैवेद्यैः पूजयेच्च दिनत्रयम्।
पुष्पालङ्कारधूपैश्च गीरसं वर्ज्जयीत च॥"
काश्मीरा पृथ्वी।
"अष्टम्याञ्च ततः स्नाप्य ताभिरेव गृहे गृहे।
सुस्नाताभिः प्रहृष्टाभिर्जीवपत्नीभिरेव च।
अनन्तरं द्विजैः स्नाप्या सर्व्वौषधियुतैर्ज्जलैः।
गन्धैर्बीजैस्तथा रत्नैः फलैः सिद्धार्थकैस्तथा॥
स्नापयित्वा च तां देवीं गन्धैर्माल्यैश्च पूजयेत्।
तन्निवेदितमिष्टञ्च प्राशितव्यं गृहे गृहे॥
अतः परमृतुस्नाता गर्भं गृह्णाति मेदिनी॥"*॥
तथा।
"ब्रह्मा विष्णुश्च रुद्रश्च काश्यपः सुरभी तथा।
इन्द्रः प्रचेताः पर्ज्जन्यः शेषश्चन्द्रार्कवह्नयः॥
बलदेवो हलं भूमिर्वृषभौ रामलक्ष्मणौ।
रक्षोघ्नी जानकी सीता युगं गगनमेव च॥
सीता लाङ्गलपद्धतिः। युगं युगकाष्ठम्।
"एते द्वाविंशतिः प्रोक्ताः प्रजानां पतयः शुभाः।
गोमङ्गले तु संपूज्याः कृष्यारम्भे महोत्सवे॥
अर्घैः पुष्पैश्च धूपैश्च माल्यै रत्नैः पृथक् पृथक्।
हलेन वाहयेद्भूमिं स्वयं स्नातः स्वलङ्कृतः॥"
तथा।
"उप्ता बीजन्तु तत्रैव भोक्तव्यं बान्धवैः सह॥"
बीजवपनं प्राजापत्यतीर्थेन। यथा, हारीतः॥
कनिष्ठायाः पश्चात् प्राजापत्यमावपनं होम-
तर्पणे प्राजापत्येन कुर्य्यात्। इति। होमतर्पणे
लाजहोमसनकादितर्पणे। राजमार्त्तण्डे।
"नित्यं दशहले लक्ष्मीर्नित्यं पञ्चहले धनम्।
नित्यञ्च त्रिहले भक्तं नित्यमेकहले ऋणम्॥"*॥
कृषिपराशरः।
"वैशाखे वपनं श्रेष्ठं मध्यमं रोहिणीरवौ।
अतः परिक्षिन्नधमं न जातु श्रावणे शुभम्॥"
ज्योतिषे।
"पूर्व्वभाद्रपदा मूलं रोहिण्युत्तरफल्गुनी।
विशाखा शतभिषा वाथ धान्यानां रोपणे
वराः॥
सदोषा रजनीं नीलीं पुत्रवित्तैर्वियुज्यते।
स्वयं जाते पुनस्ते द्वे पालयन्नेव दुष्यति॥
आरामे गृहमध्ये वा मोहात् सर्षपमावपन्।
पराभवं रिपोर्याति ससाधनधनक्षयम्॥
निशा नीली पलाशश्च चिञ्चा श्वेतापराजिता।
कोविदारश्च सर्व्वत्र सर्व्वं निघ्नन्ति मङ्गलम्॥"
निशा हरिद्रा। कोविदारको रक्तकाञ्चनः॥*
"हेमाम्भसा वृक्षबीजं स्नातो मन्त्रेण रोपयेत्॥
वसुधेति सुशीलेति पुण्यदेति धरेति च।
नमस्ते सुभगे नित्यं द्रुमोऽयं वर्द्धतामिति॥ * ॥
लिखित्वालक्तकेनापि मन्त्रं शस्येषु बन्धयेत्।
न व्याधिकीटहिंस्राणां भयं तत्र भवेत् क्वचित्॥"
सिद्धिः प्रबलतरतरङ्गतरलितस्फुटतरसमीरण-
वनोद्देशे श्रीमद्रामभद्रपादाः कुशलिनः समुद्र-
तटे नानाशतसहस्रवानराणां मध्ये खरनखर-
पक्षोर्द्ध्वलाङ्गूलं पवनसुतं वायुवेगं परचक्रप्रमथनं
श्रीमद्धनूमन्तमाज्ञापयन्ति अमुकस्याखण्डक्षेत्रे
वाताभीम्भी गान्धीकृती पाण्डरमुण्डी धूली-
शृङ्गारतल्पा कृषराङ्गता फड़िङ्गा एला वानरा
गरुड़ा इमड़का मह्रिषादिरोगं खण्डयत क्षण-
मपि विलम्बं मा चरत यदि विलम्बं कारयत
तदा युष्मान् शतखण्डं कारयामीति। ॐ घ्रां
घ्रीँ घ्रौँ श्रीरामाय नमः। इति शस्येषु बन्ध-
येत्॥*॥ धान्यच्छेदनम्। दीपिकायाम्।
"याम्याजपादहिधनानलतोयशक्र-
चित्रोत्तरोडुषु कुजार्कजवारवर्जम्।
शस्तेन्दुयोगकरणेषु तिथौ विरिक्ते
धान्यच्छिदिः स्थिरनरस्त्रमृगोदयेषु॥"
बलभद्रः।
"रेवतीहस्तमूलेषु श्रवणे नागयाम्ययोः।